# Dayanandaviro Yatirbhatu Shashvat

# दयानन्दवीरो यतिर्भातु शश्वत्

## Document Information

Text title : Dayanandaviro Yatirbhatu Shashvat

File name : dayAnandavIroyatirbhAtushashvat.itx

Category : misc, sanskritgeet, gurudev

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

Dayanandaviro Yatirbhatu Shashvat

# दयानन्दवीरो यतिर्भातु शश्वत्

(गीतिका) (भुजङ्गप्रयातम्)
दयानन्दवीरो यतिर्भातु शश्वद्
गुणानां निधिर्वेद-शास्त्रोपदेष्टा ।
सदा संयमे रक्तधीर्धीर-चेता
वरेण्यं शरण्यो मुनिः साधुवृत्तः ॥ दयानन्द० ॥

सदा देशभक्तं सदा धर्मभक्तं
सदा दीन-हीनाऽऽर्ति-नाशानुरक्तः ।
स्वदेशव्रतो देशभक्त्येक मूर्तिः
स्वदेशाभिमानेन सन्दीप्तमूर्तिः ॥ दयानन्द० ॥

सदा देशचिन्ता, सदाऽनाथ चिन्ता
दरिद्रातुराणां समुद्धार-चिन्ता ।
गवां योषितां दुःख-नाशस्य चिन्ता
सदा यस्य चित्ते स देवो वदान्यः ॥ दयानन्द० ॥

न यस्यास्ति चित्ते भयानां विभीति
न रोषाग्नि-दाहो न वा शोक शोषः ।
न यत्रास्ति चिन्ता स्वदेहस्य जातु
सदा देशचिन्ता निमग्नं सधन्यः ॥ दयानन्द० ॥

ऋषीणां मुनीनां सदाऽऽदर्श-पाता
स्ववित्तस्य दाता, स्वदेहस्य दाता ।
सदा मातृभूमेः सुरक्षाऽनुरक्तो
विदेशीय धर्मे प्रहारानुरक्तः ॥ दयानन्द० ॥

सदेवाऽऽङ्ग्लभाषा सृति खण्डयन् सः
सदा भारतीयं मतं मण्डयन् सः ।
चरिताभिमानं सदा दर्शयन् सः

स्वदेशानुरागे रतो धर्म धुर्यः ॥ दयानन्द० ॥

स्वदेशीय राज्यं मतं सर्वश्रेष्ठं
विदेशीय-राज्यं सदाऽनर्थकारि ।
स्वदेशीय राज्ये सुखं शान्तिरिष्टा
सदा स्वाभिमानं विकासोन्नती च ॥ दयानन्द० ॥

कुरीति सदा दुःखद्वन्द्वादि-कर्त्री
कुनीति सदा मानवाऽचार-हर्त्री ।
सदैवाऽन्धविश्वास मूला अनर्था
वदन् देशहेतो पपौ यो विषं च ॥ दयानन्द० ॥

सदा योषिता मान-रक्षाऽवसक्तः
सदा देश-स्वातन्त्र्य-कार्यानुरक्तः ।
सदा आर्य धर्मं प्रचारानुरागी
विरागी व्रती विश्वबन्धुत्व-मानी ॥ दयानन्द० ॥

मुदा दुःखजातं प्रसेहे परार्थं
जहौ देशहेतोः सुखं चार्थजातम् ।
सदा क्रान्ति-सन्देशदं तं नतोऽहं
सदा मातृभूः दत्त चित्तं श्रितोऽहम् ॥ दयानन्द० ॥

Proofread by Mandar Mali

*Dayanandaviro Yatirbhatu Shashvat*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*